# पातञ्जलयोगसूत्रपाठः ।

Pātañjala-Yoga-Sūtra-Pāṭhaḥ |

## प्रथमः समाधिपादः ।

Prathamaḥ Samādhi-Pādaḥ |

### अथ योगानुशासनम् ॥ १ ॥

atha yogānuśāsanam ||1.1||
atha yoga-anuśāsanam ||1.1||

### योगश्चित्तवृत्तिनिरोधः ॥ २ ॥

yogaścittavṛttinirodhaḥ ||1.2||
yogaś citta-vṛtti-nirodhaḥ ||1.2||
yogaḥ citta-vṛtti-nirodhaḥ ||1.2||

### तदा द्रष्टुः स्वरूपेऽवस्थानम् ॥ ३ ॥

tadā draṣṭuḥ svarūpe'vasthānam ||1.3||
tadā draṣṭuḥ svarūpe 'vasthānam ||1.3||
tadā draṣṭuḥ svarūpe avasthānam ||1.3||

### वृत्तिसारूप्यमितरत्र ॥ ४ ॥

vṛttisārūpyamitaratra ||1.4||
vṛtti-sārūpyam itaratra ||1.4||

### वृत्तयः पञ्चतय्यः क्लिष्टाक्लिष्टाः ॥ ५ ॥

vṛttayaḥ pañcatayyaḥ kliṣṭākliṣṭāḥ ||1.5||
vṛttayaḥ pañcatayyaḥ kliṣṭa-akliṣṭāḥ ||1.5||

### प्रमाणविपर्ययविकल्पनिद्रास्मृतयः ॥ ६ ॥

pramāṇaviparyayavikalpanidrāsmṛtayaḥ ||1.6||

pramāṇa-viparyaya-vikalpa-nidrā-smṛtayaḥ ||1.6||

प्रत्यक्षानुमानागमाः प्रमाणानि ॥ ७ ॥

pratyakṣānumānāgamāḥ pramāṇāni ||1.7||
pratyakṣa-anumāna-āgamāḥ pramāṇāni ||1.7||

विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम् ॥ ८ ॥

viparyayo mithyājñānamatadrūpapratiṣṭham ||1.8||
viparyayo mithyā-jñānam atad-rūpa-pratiṣṭham ||1.8||
viparyayaḥ mithyā-jñānam atat-rūpa-pratiṣṭham ||1.8||

शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः ॥ ९ ॥

śabdajñānānupātī vastuśūnyo vikalpaḥ ||1.9||
śabda-jñānānupātī vastu-śūnyo vikalpaḥ ||1.9||
śabda-jñāna-anupātī vastu-śūnyaḥ vikalpaḥ ||1.9||

अभावप्रत्ययालम्बना वृत्तिर्निद्रा ॥ १० ॥

abhāvapratyayālambanā vṛttirnidrā ||1.10||
abhāva-pratyaya-ālambanā vṛttiḥ nidrā ||1.10||

अनुभूतविषयासंप्रमोषः स्मृतिः ॥ ११ ॥

anubhūtaviṣayāsampramoṣaḥ smṛtiḥ ||1.11||
anubhūta-viṣayāsampramoṣaḥ smṛtiḥ ||1.11||
anubhūta-viṣaya-asampramoṣaḥ smṛtiḥ ||1.11||

अभ्यासवैराग्याभ्यां तन्निरोधः ॥ १२ ॥

abhyāsavairāgyābhyāṁ tannirodhaḥ ||1.12||
abhyāsa-vairāgyābhyāṁ tan-nirodhaḥ ||1.12||
abhyāsa-vairāgyābhyām tat-nirodhaḥ ||1.12||

तत्र स्थितौ यत्नोऽभ्यासः ॥ १३ ॥

tatra sthitau yatno'bhyāsaḥ ||1.13||

tatra sthitau yatno 'bhyāsaḥ ||1.13||
tatra sthitau yatnaḥ abhyāsaḥ ||1.13||

## स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः ॥ १४ ॥

sa tu dīrghakālanairantaryasatkārāsevito dṛḍhabhūmiḥ ||1.14||
sa tu dīrgha-kāla-nairantarya-satkārāsevito dṛḍha-bhūmiḥ ||1.14||
saḥ tu dīrgha-kāla-nairantarya-satkāra-āsevitaḥ dṛḍha-bhūmiḥ ||1.14||

## दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम् ॥ १५ ॥

dṛṣṭānuśravikaviṣayavitṛṣṇasya vaśīkārasañjñā vairāgyam ||1.15||
dṛṣṭānuśravika-viṣaya-vitṛṣṇasya vaśīkāra-sañjñā vairāgyam ||1.15||
dṛṣṭa-anuśravika-viṣaya-vitṛṣṇasya vaśīkāra-sañjñā vairāgyam ||1.15||

## तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यम् ॥ १६ ॥

tatparaṁ puruṣakhyāterguṇavaitṛṣṇyam ||1.16||
tat paraṁ puruṣa-khyāter guṇa-vaitṛṣṇyam ||1.16||
tat param puruṣa-khyāteḥ guṇa-vaitṛṣṇyam ||1.16||

## वितर्कविचारानन्दास्मितारूपानुगमात् संप्रज्ञातः ॥ १७ ॥

vitarkavicārānandāsmitārūpānugamāt samprajñātaḥ ||1.17||
vitarka-vicārānandāsmitā-rūpānugamāt samprajñātaḥ ||1.17||
vitarka-vicāra-ānanda-asmitā-rūpa-anugamāt samprajñātaḥ ||1.17||

## विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः ॥ १८ ॥

virāmapratyayābhyāsapūrvaḥ saṁskāraśeṣo'nyaḥ ||1.18||
virāma-pratyayābhyāsa-pūrvaḥ saṁskāra-śeṣo 'nyaḥ ||1.18||
virāma-pratyaya-abhyāsa-pūrvaḥ saṁskāra-śeṣaḥ anyaḥ ||1.18||

## भवप्रत्ययो विदेहप्रकृतिलयानाम् ॥ १९ ॥

bhavapratyayo videhaprakṛtilayānām ||1.19||
bhava-pratyayo videha-prakṛti-layānām ||1.19||
bhava-pratyayaḥ videha-prakṛti-layānām ||1.19||

## श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषाम्॥ २० ॥

śraddhāvīryasmṛtisamādhiprajñāpūrvaka itareṣām ||1.20||
śraddhā-vīrya-smṛti-samādhi-prajñā-pūrvaka itareṣām ||1.20||
śraddhā-vīrya-smṛti-samādhi-prajñā-pūrvakaḥ itareṣām ||1.20||

## तीव्रसंवेगानामासन्नः ॥ २१ ॥

tīvrasaṁvegānāmāsannaḥ ||1.21||
tīvra-saṁvegānām āsannaḥ ||1.21||

## मृदुमध्याधिमात्रत्वात्ततोऽपि विशेषः ॥ २२ ॥

mṛdumadhyādhimātratvāttato'pi viśeṣaḥ ||1.22||
mṛdu-madhyādhimātratvāt tato 'pi viśeṣaḥ ||1.22||
mṛdu-madhya-adhimātratvāt tataḥ api viśeṣaḥ ||1.22||

## ईश्वरप्रणिधानाद्वा ॥ २३ ॥

īśvarapraṇidhānādvā ||1.23||
īśvara-praṇidhānād vā ||1.23||
īśvara-praṇidhānāt vā ||1.23||

## क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः ॥ २४ ॥

kleśakarmavipākāśayairaparāmṛṣṭaḥ puruṣaviśeṣa īśvaraḥ ||1.24||
kleśa-karma-vipākāśayair aparāmṛṣṭaḥ puruṣa-viśeṣa īśvaraḥ ||1.24||
kleśa-karma-vipāka-āśayaiḥ aparāmṛṣṭaḥ puruṣa-viśeṣaḥ īśvaraḥ ||1.24||

## तत्र निरतिशयं सर्वज्ञबीजम्॥ २५ ॥

tatra niratiśayaṁ sarvajñabījam ||1.25||
tatra niratiśayaṁ sarvajña-bījam ||1.25||
tatra niratiśayam sarvajña-bījam ||1.25||

## स पूर्वेषामपि गुरुः कालेनानवच्छेदात्॥ २६ ॥

sa pūrveṣāmapi guruḥ kālenānavacchedāt ||1.26||

sa pūrveṣām api guruḥ kālenānavacchedāt ||1.26||
saḥ pūrveṣām api guruḥ kālena anavacchedāt ||1.26||

## तस्य वाचकः प्रणवः ॥ २७ ॥

tasya vācakaḥ praṇavaḥ ||1.27||

## तज्जपस्तदर्थभावनम् ॥ २८ ॥

tajjapastadarthabhāvanam ||1.28||
taj-japas tad-artha-bhāvanam ||1.28||
tat-japaḥ tat-artha-bhāvanam ||1.28||

## ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च ॥ २९ ॥

tataḥ pratyakcetanādhigamo'pyantarāyābhāvaśca ||1.29||
tataḥ pratyak-cetanādhigamo 'py antarāyābhāvaś ca ||1.29||
tataḥ pratyak-cetanā-adhigamaḥ api antarāya-abhāvaḥ ca ||1.29||

## व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः ॥ ३० ॥

vyādhistyānasaṁśayapramādālasyāviratibhrāntidarśanālabdhabhūmikatvānavasthitatvāni cittavikṣepāste'ntarāyāḥ ||1.30||
vyādhi-styāna-saṁśaya-pramādālasyāvirati-bhrānti-darśanālabdha-bhūmikatvānavasthitatvāni citta-vikṣepās te 'ntarāyāḥ ||1.30||
vyādhi-styāna-saṁśaya-pramāda-ālasya-avirati-bhrānti-darśana-alabdha-bhūmikatva-anavasthitatvāni citta-vikṣepāḥ te antarāyāḥ ||1.30||

## दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः ॥ ३१ ॥

duḥkhadaurmanasyāṅgamejayatvaśvāsapraśvāsā vikṣepasahabhuvaḥ ||1.31||
duḥkha-daurmanasyāṅgam-ejayatva-śvāsa-praśvāsā vikṣepa-sahabhuvaḥ ||1.31||
duḥkha-daurmanasya-aṅgam-ejayatva-śvāsa-praśvāsāḥ vikṣepa-sahabhuvaḥ ||1.31||

## तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः ॥ ३२ ॥

tatpratiṣedhārthamekatattvābhyāsaḥ ||1.32||

tat-pratiṣedhārtham eka-tattvābhyāsaḥ ||1.32||
tat-pratiṣedha-artham eka-tattva-abhyāsaḥ ||1.32||

## मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम्॥ ३३ ॥

maitrīkaruṇāmuditopekṣāṇāṁ sukhaduḥkhapuṇyāpuṇyaviṣayāṇāṁ bhāvanātaścittaprasādanam ||1.33||
maitrī-karuṇā-muditopekṣāṇāṁ sukha-duḥkha-puṇyāpuṇya-viṣayāṇāṁ bhāvanātaś citta-prasādanam ||1.33||
maitrī-karuṇā-muditā-upekṣāṇām sukha-duḥkha-puṇya-apuṇya-viṣayāṇām bhāvanātaḥ citta-prasādanam ||1.33||

## प्रच्छर्दनविधारणाभ्यां वा प्राणस्य॥ ३४ ॥

pracchardanavidhāraṇābhyāṁ vā prāṇasya ||1.34||
pracchardana-vidhāraṇābhyāṁ vā prāṇasya ||1.34||
pracchardana-vidhāraṇābhyām vā prāṇasya ||1.34||

## विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबन्धनी॥ ३५ ॥

viṣayavatī vā pravṛttirutpannā manasaḥ sthitinibandhanī ||1.35||
viṣayavatī vā pravṛttir utpannā manasaḥ sthiti-nibandhanī ||1.35||
viṣayavatī vā pravṛttiḥ utpannā manasaḥ sthiti-nibandhanī ||1.35||

## विशोका वा ज्योतिष्मती॥ ३६ ॥

viśokā vā jyotiṣmatī ||1.36||

## वीतरागविषयं वा चित्तम्॥ ३७ ॥

vītarāgaviṣayaṁ vā cittam ||1.37||
vīta-rāga-viṣayaṁ vā cittam ||1.37||
vīta-rāga-viṣayam vā cittam ||1.37||

## स्वप्ननिद्राज्ञानालम्बनं वा॥ ३८ ॥

svapnanidrājñānālambanaṁ vā ||1.38||
svapna-nidrā-jñānālambanaṁ vā ||1.38||
svapna-nidrā-jñāna-ālambanam vā ||1.38||

### यथाभिमतध्यानाद्वा ॥ ३९ ॥

yathābhimatadhyānādvā ||1.39||
yathābhimata-dhyānād vā ||1.39||
yathā-abhimata-dhyānāt vā ||1.39||

### परमाणुपरममहत्त्वान्तोऽस्य वशीकारः ॥ ४० ॥

paramāṇuparamamahattvānto'sya vaśīkāraḥ ||1.40||
paramāṇu-parama-mahattvānto 'sya vaśīkāraḥ ||1.40||
parama-aṇu-parama-mahattva-antaḥ asya vaśīkāraḥ ||1.40||

### क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनतासमापत्तिः ॥ ४१ ॥

kṣīṇavṛtterabhijātasyeva maṇergrahītṛgrahaṇagrāhyeṣu tatsthatadañjanatāsamāpattiḥ ||1.41||
kṣīṇa-vṛtter abhijātasyeva maṇer grahītṛ-grahaṇa-grāhyeṣu tat-stha-tad-añjanatā samāpattiḥ ||1.41||
kṣīṇa-vṛtteḥ abhijātasya iva maṇeḥ grahītṛ-grahaṇa-grāhyeṣu tat-stha-tat-añjanatā samāpattiḥ ||1.41||

### तत्र शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का समापत्तिः ॥ ४२ ॥

tatra śabdārthajñānavikalpaiḥ saṅkīrṇā savitarkā samāpattiḥ ||1.42||
tatra śabdārtha-jñāna-vikalpaiḥ saṅkīrṇā savitarkā samāpattiḥ ||1.42||
tatra śabda-artha-jñāna-vikalpaiḥ saṅkīrṇā savitarkā samāpattiḥ ||1.42||

### स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का ॥ ४३ ॥

smṛtipariśuddhau svarūpaśūnyevārthamātranirbhāsā nirvitarkā ||1.43||
smṛti-pariśuddhau svarūpa-śūnyevārtha-mātra-nirbhāsā nirvitarkā ||1.43||
smṛti-pariśuddhau svarūpa-śūnyā-iva-artha-mātra-nirbhāsā nirvitarkā ||1.43||

### एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता ॥ ४४ ॥

etayaiva savicārā nirvicārā ca sūkṣmaviṣayā vyākhyātā ||1.44||
etayaiva savicārā nirvicārā ca sūkṣma-viṣayā vyākhyātā ||1.44||
etayā eva savicārā nirvicārā ca sūkṣma-viṣayā vyākhyātā ||1.44||

### सूक्ष्मविषयत्वं चालिङ्गपर्यवसानम् ॥ ४५ ॥

sūkṣmaviṣayatvaṁ cāliṅgaparyavasānam ||1.45||
sūkṣma-viṣayatvaṁ cāliṅga-paryavasānam ||1.45||
sūkṣma-viṣayatvam ca aliṅga-paryavasānam ||1.45||

## ता एव सबीजः समाधिः ॥ ४६ ॥

tā eva sabījaḥ samādhiḥ ||1.46||
tāḥ eva sabījaḥ samādhiḥ ||1.46||

## निर्विचारवैशारद्येऽध्यात्मप्रसादः ॥ ४७ ॥

nirvicāravaiśāradye'dhyātmaprasādaḥ ||1.47||
nirvicāra-vaiśāradye 'dhyātma-prasādaḥ ||1.47||
nirvicāra-vaiśāradye adhyātma-prasādaḥ ||1.47||

## ऋतंभरा तत्र प्रज्ञा ॥ ४८ ॥

ṛtambharā tatra prajñā ||1.48||
ṛtam-bharā tatra prajñā ||1.48||

## श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात् ॥ ४९ ॥

śrutānumānaprajñābhyāmanyaviṣayā viśeṣārthatvāt ||1.49||
śruta-anumāna-prajñābhyām anya-viṣayā viśeṣārthatvāt ||1.49||
śruta-anumāna-prajñābhyām anya-viṣayā viśeṣa-arthatvāt ||1.49||

## तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी ॥ ५० ॥

tajjaḥ saṁskāro'nyasaṁskārapratibandhī ||1.50||
taj-jaḥ saṁskāro 'nya-saṁskāra-pratibandhī ||1.50||
tat-jaḥ saṁskāraḥ anya-saṁskāra-pratibandhī ||1.50||

## तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः ॥ ५१ ॥

tasyāpi nirodhe sarvanirodhānnirbījaḥ samādhiḥ ||1.51||
tasyāpi nirodhe sarva-nirodhān nirbījaḥ samādhiḥ ||1.51||
tasya api nirodhe sarva-nirodhāt nirbījaḥ samādhiḥ ||1.51||

इति पतञ्जलिविरचिते योगसूत्रे प्रथमः समाधिपादः ।

iti patañjaliviracite yogasūtre prathamaḥ samādhipādaḥ |
iti patañjali-viracite yoga-sūtre prathamaḥ samādhi-pādaḥ |

## द्वितीयः साधनपादः ।

Dvitīyaḥ Sādhana-Pādaḥ |

### तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः ॥ १ ॥

tapaḥsvādhyāyeśvarapraṇidhānāni kriyāyogaḥ ||2.1||
tapaḥ-svādhyāyeśvara-praṇidhānāni kriyā-yogaḥ ||2.1||
tapaḥ-svādhyāya-īśvara-praṇidhānāni kriyā-yogaḥ ||2.1||

### समाधिभावनार्थः क्लेशतनूकरणार्थश्च ॥ २ ॥

samādhibhāvanārthaḥ kleśatanūkaraṇārthaśca ||2.2||
samādhi-bhāvanārthaḥ kleśa-tanū-karaṇārthaś ca ||2.2||
samādhi-bhāvana-arthaḥ kleśa-tanū-karaṇa-arthaḥ ca ||2.2||

### अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः ॥ ३ ॥

avidyāsmitārāgadveṣābhiniveśāḥ kleśāḥ ||2.3||
avidyāsmitā-rāga-dveṣābhiniveśāḥ kleśāḥ ||2.3||
avidyā-asmitā-rāga-dveṣa-abhiniveśāḥ kleśāḥ ||2.3||

### अविद्या क्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणाम् ॥ ४ ॥

avidyā kṣetramuttareṣāṁ prasuptatanuvicchinnodārāṇām ||2.4||
avidyā kṣetram uttareṣāṁ prasupta-tanu-vicchinnodārāṇām ||2.4||
avidyā kṣetram uttareṣām prasupta-tanu-vicchinna-udārāṇām ||2.4||

### अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या ॥ ५ ॥

anityāśuciduḥkhānātmasu nityaśucisukhātmakhyātiravidyā ||2.5||
anityāśuci-duḥkhānātmasu nitya-śuci-sukhātma-khyātir avidyā ||2.5||
anitya-aśuci-duḥkha-anātmasu nitya-śuci-sukha-ātma-khyātiḥ avidyā ||2.5||

दृग्दर्शनशक्त्योरेकात्मतेवास्मिता ॥ ६ ॥

dṛgdarśanaśaktyorekātmatevāsmitā ||2.6||
dṛg-darśana-śaktyor ekātmatevāsmitā ||2.6||
dṛk-darśana-śaktyoḥ eka-ātmatā iva asmitā ||2.6||

सुखानुशयी रागः ॥ ७ ॥

sukhānuśayī rāgaḥ ||2.7||
sukha-anuśayī rāgaḥ ||2.7||

दुःखानुशयी द्वेषः ॥ ८ ॥

duḥkhānuśayī dveṣaḥ ||2.8||
duḥkha-anuśayī dveṣaḥ ||2.8||

स्वरसवाही विदुषोऽपि तथा रूढोऽभिनिवेशः ॥ ९ ॥

svarasavāhī viduṣo'pi tathā rūḍho'bhiniveśaḥ ||2.9||
sva-rasa-vāhī viduṣo 'pi tathā rūḍho 'bhiniveśaḥ ||2.9||
sva-rasa-vāhī viduṣaḥ api tathā rūḍhaḥ abhiniveśaḥ ||2.9||

ते प्रतिप्रसवहेयाः सूक्ष्माः ॥ १० ॥

te pratiprasavaheyāḥ sūkṣmāḥ ||2.10||
te pratiprasava-heyāḥ sūkṣmāḥ ||2.10||

ध्यानहेयास्तद्वृत्तयः ॥ ११ ॥

dhyānaheyāstadvṛttayaḥ ||2.11||
dhyāna-heyās tad-vṛttayaḥ ||2.11||
dhyāna-heyāḥ tat-vṛttayaḥ ||2.11||

क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः ॥ १२ ॥

kleśamūlaḥ karmāśayo dṛṣṭādṛṣṭajanmavedanīyaḥ ||2.12||
kleśa-mūlaḥ karmāśayo dṛṣṭādṛṣṭa-janma-vedanīyaḥ ||2.12||
kleśa-mūlaḥ karma-āśayaḥ dṛṣṭa-adṛṣṭa-janma-vedanīyaḥ ||2.12||

## सति मूले तद्विपाको जात्यायुर्भोगाः ॥ १३ ॥

sati mūle tadvipāko jātyāyurbhogāḥ ||2.13||
sati mūle tad-vipāko jāty-āyur-bhogāḥ ||2.13||
sati mūle tat-vipākaḥ jāti-āyuḥ-bhogāḥ ||2.13||

## ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात् ॥ १४ ॥

te hlādaparitāpaphalāḥ puṇyāpuṇyahetutvāt ||2.14||
te hlāda-paritāpa-phalāḥ puṇyāpuṇya-hetutvāt ||2.14||
te hlāda-paritāpa-phalāḥ puṇya-apuṇya-hetutvāt ||2.14||

## परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः ॥ १५ ॥

pariṇāmatāpasaṁskāraduḥkhairguṇavṛttivirodhācca duḥkhameva sarvaṁ vivekinaḥ ||2.15||
pariṇāma-tāpa-saṁskāra-duḥkhair guṇa-vṛtti-virodhāc ca duḥkham eva sarvaṁ vivekinaḥ ||2.15||
pariṇāma-tāpa-saṁskāra-duḥkhaiḥ guṇa-vṛtti-virodhāt ca duḥkham eva sarvam vivekinaḥ ||2.15||

## हेयं दुःखमनागतम् ॥ १६ ॥

heyaṁ duḥkhamanāgatam ||2.16||
heyaṁ duḥkham anāgatam ||2.16||
heyam duḥkham anāgatam ||2.16||

## द्रष्टृदृश्ययोः संयोगो हेयहेतुः ॥ १७ ॥

draṣṭṛdṛśyayoḥ saṁyogo heyahetuḥ ||2.17||
draṣṭṛ-dṛśyayoḥ saṁyogo heya-hetuḥ ||2.17||
draṣṭṛ-dṛśyayoḥ saṁyogaḥ heya-hetuḥ ||2.17||

## प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम् ॥ १८ ॥

prakāśakriyāsthitiśīlaṁ bhūtendriyātmakaṁ bhogāpavargārthaṁ dṛśyam ||2.18||
prakāśa-kriyā-sthiti-śīlaṁ bhūtendriyātmakaṁ bhogāpavargārthaṁ dṛśyam ||2.18||
prakāśa-kriyā-sthiti-śīlam bhūta-indriya-ātmakam bhoga-apavarga-artham dṛśyam ||2.18||

## विशेषाविशेषलिङ्गमात्रालिङ्गानि गुणपर्वाणि ॥ १९ ॥

viśeṣāviśeṣaliṅgamātrāliṅgāni guṇaparvāṇi ||2.19||

viśeṣa-aviśeṣa-liṅga-mātra-aliṅgāni guṇa-parvāṇi ||2.19||

## द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः ॥ २० ॥

draṣṭā dṛśimātraḥ śuddho'pi pratyayānupaśyaḥ ||2.20||
draṣṭā dṛśi-mātraḥ śuddho 'pi pratyayānupaśyaḥ ||2.20||
draṣṭā dṛśi-mātraḥ śuddhaḥ api pratyaya-anupaśyaḥ ||2.20||

## तदर्थ एव दृश्यस्यात्मा ॥ २१ ॥

tadartha eva dṛśyasyātmā ||2.21||
tad-artha eva dṛśyasyātmā ||2.21||
tat-arthaḥ eva dṛśyasya ātmā ||2.21||

## कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वात् ॥ २२ ॥

kṛtārthaṁ prati naṣṭamapyanaṣṭaṁ tadanyasādhāraṇatvāt ||2.22||
kṛtārthaṁ prati naṣṭam apy anaṣṭaṁ tad anya-sādhāraṇatvāt ||2.22||
kṛta-artham prati naṣṭam api anaṣṭam tat anya-sādhāraṇatvāt ||2.22||

## स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः ॥ २३ ॥

svasvāmiśaktyoḥ svarūpopalabdhihetuḥ saṁyogaḥ ||2.23||
sva-svāmi-śaktyoḥ svarūpopalabdhi-hetuḥ saṁyogaḥ ||2.23||
sva-svāmi-śaktyoḥ svarūpa-upalabdhi-hetuḥ saṁyogaḥ ||2.23||

## तस्य हेतुरविद्या ॥ २४ ॥

tasya heturavidyā ||2.24||
tasya hetur avidyā ||2.24||
tasya hetuḥ avidyā ||2.24||

## तदभावात् संयोगाभावो हानं तद्दृशेः कैवल्यम् ॥ २५ ॥

tadabhāvāt saṁyogābhāvo hānaṁ taddṛśeḥ kaivalyam ||2.25||
tad-abhāvāt saṁyogābhāvo hānaṁ tad dṛśeḥ kaivalyam ||2.25||
tat-abhāvāt saṁyoga-abhāvaḥ hānam tat dṛśeḥ kaivalyam ||2.25||

## विवेकख्यातिरविप्लवा हानोपायः ॥ २६ ॥

vivekakhyātiraviplavā hānopāyaḥ ||2.26||
viveka-khyātir aviplavā hānopāyaḥ ||2.26||
viveka-khyātiḥ aviplavā hāna-upāyaḥ ||2.26||

## तस्य सप्तधा प्रान्तभूमिः प्रज्ञा ॥ २७ ॥

tasya saptadhā prāntabhūmiḥ prajñā ||2.27||
tasya saptadhā prānta-bhūmiḥ prajñā ||2.27||

## योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिरा विवेकख्यातेः ॥ २८ ॥

yogāṅgānuṣṭhānādaśuddhikṣaye jñānadīptirā vivekakhyāteḥ ||2.28||
yogāṅgānuṣṭhānād aśuddhi-kṣaye jñāna-dīptir ā-viveka-khyāteḥ ||2.28||
yoga-aṅga-anuṣṭhānāt aśuddhi-kṣaye jñāna-dīptiḥ ā-viveka-khyāteḥ ||2.28||

## यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि ॥ २९ ॥

yamaniyamāsanaprāṇāyāmapratyāhāradhāraṇādhyānasamādhayo'ṣṭāvaṅgāni ||2.29||
yama-niyamāsana-prāṇāyāma-pratyāhāra-dhāraṇā-dhyāna-samādhayo 'ṣṭāv aṅgāni ||2.29||
yama-niyama-āsana-prāṇāyāma-pratyāhāra-dhāraṇā-dhyāna-samādhayah aṣṭau aṅgāni ||2.29||

## अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः ॥ ३० ॥

ahiṁsāsatyāsteyabrahmacaryāparigrahā yamāḥ ||2.30||
ahiṁsā-satyāsteya-brahmacaryāparigrahā yamāḥ ||2.30||
ahiṁsā-satya-asteya-brahmacarya-aparigrahāḥ yamāḥ ||2.30||

## जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतम् ॥ ३१ ॥

jātideśakālasamayānavacchinnāḥ sārvabhaumā mahāvratam ||2.31||
jāti-deśa-kāla-samayānavacchinnāḥ sārva-bhaumā mahā-vratam ||2.31||
jāti-deśa-kāla-samaya-anavacchinnāḥ sārva-bhaumāḥ mahā-vratam ||2.31||

## शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः ॥ ३२ ॥

śaucasantoṣatapaḥsvādhyāyeśvarapraṇidhānāni niyamāḥ ||2.32||
śauca-santoṣa-tapaḥ-svādhyāyeśvara-praṇidhānāni niyamāḥ ||2.32||

śauca-santoṣa-tapaḥ-svādhyāya-īśvara-praṇidhānāni niyamāḥ ||2.32||

## वितर्कबाधने प्रतिपक्षभावनम् ॥ ३३ ॥

vitarkabādhane pratipakṣabhāvanam ||2.33||
vitarka-bādhane pratipakṣa-bhāvanam ||2.33||

## वितर्का हिंसादयः कृतकारितानुमोदिता लोभक्रोधमोहपूर्वका मृदुमध्याधिमात्रा दुःखाज्ञानानन्तफला इति प्रतिपक्षभावनम् ॥ ३४ ॥

vitarkā hiṁsādayaḥ kṛtakāritānumoditā lobhakrodhamohapūrvakā mṛdumadhyādhimātrā duḥkhājñānānantaphalā iti pratipakṣabhāvanam ||2.34||
vitarkā hiṁsādayaḥ kṛta-kāritānumoditā lobha-krodha-moha-pūrvakā mṛdu-madhyādhimātrā duḥkhājñānānanta-phalā iti pratipakṣa-bhāvanam ||2.34||
vitarkāḥ hiṁsā-ādayaḥ kṛta-kārita-anumoditāḥ lobha-krodha-moha-pūrvakāḥ mṛdu-madhya-adhimātrāḥ duḥkha-ajñāna-ananta-phalāḥ iti pratipakṣa-bhāvanam ||2.34||

## अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः ॥ ३५ ॥

ahiṁsāpratiṣṭhāyāṁ tatsannidhau vairatyāgaḥ ||2.35||
ahiṁsā-pratiṣṭhāyāṁ tat-sannidhau vaira-tyāgaḥ ||2.35||
ahiṁsā-pratiṣṭhāyām tat-sannidhau vaira-tyāgaḥ ||2.35||

## सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम् ॥ ३६ ॥

satyapratiṣṭhāyāṁ kriyāphalāśrayatvam ||2.36||
satya-pratiṣṭhāyāṁ kriyā-phalāśrayatvam ||2.36||
satya-pratiṣṭhāyām kriyā-phala-āśrayatvam ||2.36||

## अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम् ॥ ३७ ॥

asteyapratiṣṭhāyāṁ sarvaratnopasthānam ||2.37||
asteya-pratiṣṭhāyāṁ sarva-ratnopasthānam ||2.37||
asteya-pratiṣṭhāyām sarva-ratna-upasthānam ||2.37||

## ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः ॥ ३८ ॥

brahmacaryapratiṣṭhāyāṁ vīryalābhaḥ ||2.38||

brahmacarya-pratiṣṭhāyāṁ vīrya-lābhaḥ ||2.38||
brahmacarya-pratiṣṭhāyām vīrya-lābhaḥ ||2.38||

## अपरिग्रहस्थैर्ये जन्मकथंतासंबोधः ॥ ३९ ॥

aparigrahasthairye janmakathantāsambodhaḥ ||2.39||
aparigraha-sthairye janma-kathantā-sambodhaḥ ||2.39||

## शौचात्स्वाङ्गजुगुप्सा परैरसंसर्गः ॥ ४० ॥

śaucātsvāṅgajugupsā parairasaṁsargaḥ ||2.40||
śaucāt svāṅga-jugupsā parair asaṁsargaḥ ||2.40||
śaucāt sva-aṅga-jugupsā paraiḥ asaṁsargaḥ ||2.40||

## सत्त्वशुद्धिसौमनस्यैकाग्र्येन्द्रियजयात्मदर्शनयोग्यत्वानि च ॥ ४१ ॥

sattvaśuddhisaumanasyaikāgryendriyajayātmadarśanayogyatvāni ca ||2.41||
sattva-śuddhi-saumanasyaikāgryendriya-jayātma-darśana-yogyatvāni ca ||2.41||
sattva-śuddhi-saumanasya-eka-agrya-indriya-jaya-ātma-darśana-yogyatvāni ca ||2.41||

## संतोषादनुत्तमः सुखलाभः ॥ ४२ ॥

santoṣādanuttamaḥ sukhalābhaḥ ||2.42||
santoṣād anuttamaḥ sukha-lābhaḥ ||2.42||
santoṣāt anuttamaḥ sukha-lābhaḥ ||2.42||

## कायेन्द्रियसिद्धिरशुद्धिक्षयात्तपसः ॥ ४३ ॥

kāyendriyasiddhiraśuddhikṣayāttapasaḥ ||2.43||
kāyendriya-siddhir aśuddhi-kṣayāt tapasaḥ ||2.43||
kāya-indriya-siddhiḥ aśuddhi-kṣayāt tapasaḥ ||2.43||

## स्वाध्यायाद् इष्टदेवतासंप्रयोगः ॥ ४४ ॥

svādhyāyād iṣṭadevatāsamprayogaḥ ||2.44||
svādhyāyād iṣṭa-devatā-samprayogaḥ ||2.44||
svādhyāyāt iṣṭa-devatā-samprayogaḥ ||2.44||

## समाधिसिद्धिरीश्वरप्रणिधानात् ॥ ४५ ॥

samādhisiddhirīśvarapraṇidhānāt ||2.45||
samādhi-siddhir īśvara-praṇidhānāt ||2.45||
samādhi-siddhiḥ īśvara-praṇidhānāt ||2.45||

## स्थिरसुखमासनम् ॥ ४६ ॥

sthirasukhamāsanam ||2.46||
sthira-sukham āsanam ||2.46||

## प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम् ॥ ४७ ॥

prayatnaśaithilyānantasamāpattibhyām ||2.47||
prayatna-śaithilyānanta-samāpattibhyām ||2.47||
prayatna-śaithilya-ananta-samāpattibhyām ||2.47||

## ततो द्वन्द्वानभिघातः ॥ ४८ ॥

tato dvandvānabhighātaḥ ||2.48||
tataḥ dvandva-anabhighātaḥ ||2.48||

## तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः ॥ ४९ ॥

tasminsati śvāsapraśvāsayorgativicchedaḥ prāṇāyāmaḥ ||2.49||
tasmin sati śvāsa-praśvāsayor gati-vicchedaḥ prāṇāyāmaḥ ||2.49||
tasmin sati śvāsa-praśvāsayoḥ gati-vicchedaḥ prāṇāyāmaḥ ||2.49||

## बाह्याभ्यन्तरस्तम्भवृत्तिर्देशकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्मः ॥ ५० ॥

bāhyābhyantarastambhavṛttirdeśakālasaṅkhyābhiḥ paridṛṣṭo dīrghasūkṣmaḥ ||2.50||
bāhyābhyantara-stambha-vṛttir deśa-kāla-saṅkhyābhiḥ paridṛṣṭo dīrgha-sūkṣmaḥ ||2.50||
bāhya-abhyantara-stambha-vṛttiḥ deśa-kāla-saṅkhyābhiḥ paridṛṣṭaḥ dīrgha-sūkṣmaḥ ||2.50||

## बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः ॥ ५१ ॥

bāhyābhyantaraviṣayākṣepī caturthaḥ ||2.51||
bāhyābhyantara-viṣayākṣepī caturthaḥ ||2.51||
bāhya-abhyantara-viṣaya-ākṣepī caturthaḥ ||2.51||

ततः क्षीयते प्रकाशावरणम् ॥ ५२ ॥

tataḥ kṣīyate prakāśāvaraṇam ||2.52||
tataḥ kṣīyate prakāśa-āvaraṇam ||2.52||

धारणासु च योग्यता मनसः ॥ ५३ ॥

dhāraṇāsu ca yogyatā manasaḥ ||2.53||

स्वविषयासंप्रयोगे चित्तस्य स्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः ॥ ५४ ॥

svaviṣayāsamprayoge cittasya svarūpānukāra ivendriyāṇāṁ pratyāhāraḥ ||2.54||
sva-viṣayāsamprayoge cittasya svarūpānukāra ivendriyāṇāṁ pratyāhāraḥ ||2.54||
sva-viṣaya-asamprayoge cittasya svarūpa-anukāraḥ iva indriyāṇām pratyāhāraḥ ||2.54||

ततः परमा वश्यतेन्द्रियाणाम् ॥ ५५ ॥

tataḥ paramā vaśyatendriyāṇām ||2.55||
tataḥ paramā vaśyatā indriyāṇām ||2.55||

इति पतञ्जलिविरचिते योगसूत्रे द्वितीयः साधनपादः ।

iti patañjaliviracite yogasūtre dvitīyaḥ sādhanapādaḥ |
iti patañjali-viracite yoga-sūtre dvitīyaḥ sādhana-pādaḥ |

## तृतीयो विभूतिपादः ।

## Tṛtīyo Vibhūti-Pādaḥ |
## Tṛtīyaḥ Vibhūti-Pādaḥ |

देशबन्धश्चित्तस्य धारणा ॥ १ ॥

deśabandhaścittasya dhāraṇā ||3.1||
deśa-bandhaś cittasya dhāraṇā ||3.1||
deśa-bandhaḥ cittasya dhāraṇā ||3.1||

तत्र प्रत्ययैकतानता ध्यानम् ॥ २ ॥

tatra pratyayaikatānatā dhyānam ||3.2||
tatra pratyaya-eka-tānatā dhyānam ||3.2||

## तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः ॥ ३ ॥

tadevārthamātranirbhāsaṁ svarūpaśūnyamiva samādhiḥ ||3.3||
tad evārtha-mātra-nirbhāsaṁ svarūpa-śūnyam iva samādhiḥ ||3.3||
tat eva artha-mātra-nirbhāsam svarūpa-śūnyam iva samādhiḥ ||3.3||

## त्रयमेकत्र संयमः ॥ ४ ॥

trayamekatra saṁyamaḥ ||3.4||
trayam ekatra saṁyamaḥ ||3.4||

## तज्जयात् प्रज्ञालोकः ॥ ५ ॥

tajjayāt prajñālokaḥ ||3.5||
taj-jayāt prajñālokaḥ ||3.5||
tat-jayāt prajñā-ālokaḥ ||3.5||

## तस्य भूमिषु विनियोगः ॥ ६ ॥

tasya bhūmiṣu viniyogaḥ ||3.6||

## त्रयमन्तरङ्गं पूर्वेभ्यः ॥ ७ ॥

trayamantaraṅgaṁ pūrvebhyaḥ ||3.7||
trayam antar-aṅgaṁ pūrvebhyaḥ ||3.7||
trayam antaḥ-aṅgam pūrvebhyaḥ ||3.7||

## तदपि बहिरङ्गं निर्बीजस्य ॥ ८ ॥

tadapi bahiraṅgaṁ nirbījasya ||3.8||
tad api bahir-aṅgaṁ nirbījasya ||3.8||
tat api bahiḥ-aṅgam nirbījasya ||3.8||

## व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो निरोधपरिणामः ॥ ९ ॥

vyutthānanirodhasaṁskārayorabhibhavaprādurbhāvau nirodhakṣaṇacittānvayo nirodhapariṇāmaḥ

||3.9||
vyutthāna-nirodha-saṁskārayor abhibhava-prādurbhāvau nirodha-kṣaṇa-cittānvayo nirodha-pariṇāmaḥ ||3.9||
vyutthāna-nirodha-saṁskārayoḥ abhibhava-prādurbhāvau nirodha-kṣaṇa-citta-anvayaḥ nirodha-pariṇāmaḥ ||3.9||

## तस्य प्रशान्तवाहिता संस्कारात्॥ १० ॥

tasya praśāntavāhitā saṁskārāt ||3.10||
tasya praśānta-vāhitā saṁskārāt ||3.10||

## सर्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधिपरिणामः॥ ११ ॥

sarvārthataikāgratayoḥ kṣayodayau cittasya samādhipariṇāmaḥ ||3.11||
sarvārthataikāgratayoḥ kṣayodayau cittasya samādhi-pariṇāmaḥ ||3.11||
sarva-arthatā-ekāgratayoḥ kṣaya-udayau cittasya samādhi-pariṇāmaḥ ||3.11||

## ततः पुनः शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणामः॥ १२ ॥

tataḥ punaḥ śāntoditau tulyapratyayau cittasyaikāgratāpariṇāmaḥ ||3.12||
tataḥ punaḥ śāntoditau tulya-pratyayau cittasyaikāgratā-pariṇāmaḥ ||3.12||
tataḥ punaḥ śānta-uditau tulya-pratyayau cittasya ekāgratā-pariṇāmaḥ ||3.12||

## एतेन भूतेन्द्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याताः॥ १३ ॥

etena bhūtendriyeṣu dharmalakṣaṇāvasthāpariṇāmā vyākhyātāḥ ||3.13||
etena bhūtendriyeṣu dharma-lakṣaṇāvasthā-pariṇāmā vyākhyātāḥ ||3.13||
etena bhūta-indriyeṣu dharma-lakṣaṇa-avasthā-pariṇāmāḥ vyākhyātāḥ ||3.13||

## शान्तोदिताव्यपदेश्यधर्मानुपाती धर्मी॥ १४ ॥

śāntoditāvyapadeśyadharmānupātī dharmī ||3.14||
śāntoditāvyapadeśya-dharmānupātī dharmī ||3.14||
śānta-udita-avyapadeśya-dharma-anupātī dharmī ||3.14||

## क्रमान्यत्वं परिणामान्यत्वे हेतुः॥ १५ ॥

kramānyatvaṁ pariṇāmānyatve hetuḥ ||3.15||
krama-anyatvam pariṇāma-anyatve hetuḥ ||3.15||

## परिणामत्रयसंयमादतीतानागतज्ञानम् ॥ १६ ॥

pariṇāmatrayasaṁyamādatītānāgatajñānam ||3.16||
pariṇāma-traya-saṁyamād atītānāgata-jñānam ||3.16||
pariṇāma-traya-saṁyamāt atīta-anāgata-jñānam ||3.16||

## शब्दार्थप्रत्ययानामितरेतराध्यासात्संकरस्तत्प्रविभागसंयमात्सर्वभूतरुतज्ञानम् ॥ १७ ॥

śabdārthapratyayānāmitaretarādhyāsātsaṅkarastatpravibhāgasaṁyamātsarvabhūtarutajñānam ||3.17||
śabdārtha-pratyayānām itaretarādhyāsāt saṅkaras tat-pravibhāga-saṁyamāt sarva-bhūta-ruta-jñānam ||3.17||
śabda-artha-pratyayānām itara-itara-adhyāsāt saṅkaraḥ tat-pravibhāga-saṁyamāt sarva-bhūta-ruta-jñānam ||3.17||

## संस्कारसाक्षात्करणात्पूर्वजातिज्ञानम् ॥ १८ ॥

saṁskārasākṣātkaraṇātpūrvajātijñānam ||3.18||
saṁskāra-sākṣāt-karaṇāt pūrva-jāti-jñānam ||3.18||

## प्रत्ययस्य परचित्तज्ञानम् ॥ १९ ॥

pratyayasya paracittajñānam ||3.19||
pratyayasya para-citta-jñānam ||3.19||

## न च तत्सालम्बनं तस्याविषयीभूतत्वात् ॥ २० ॥

na ca tatsālambanaṁ tasyāviṣayībhūtatvāt ||3.20||
na ca tat sālambanaṁ tasya aviṣayī-bhūtatvāt ||3.20||
na ca tat sa-ālambanam tasya aviṣayī-bhūtatvāt ||3.20||

## कायरूपसंयमात्तद्ग्राह्यशक्तिस्तम्भे चक्षुःप्रकाशासंप्रयोगेऽन्तर्धानम् ॥ २१ ॥

kāyarūpasaṁyamāttadgrāhyaśaktistambhe cakṣuḥprakāśāsamprayoge'ntardhānam ||3.21||
kāya-rūpa-saṁyamāt tad-grāhya-śakti-stambhe cakṣuḥ-prakāśāsamprayoge 'ntar-dhānam ||3.21||
kāya-rūpa-saṁyamāt tat-grāhya-śakti-stambhe cakṣuḥ-prakāśa-asamprayoge antaḥ-dhānam ||3.21||

## सोपक्रमं निरुपक्रमं च कर्म । तत्संयमादपरान्तज्ञानम् अरिष्टेभ्यो वा ॥ २२ ॥

sopakramaṁ nirupakramaṁ ca karma|3.tatsaṁyamādaparāntajñānam ariṣṭebhyo vā ||3.22||
sopakramaṁ nirupakramaṁ ca karma tat-saṁyamād aparānta-jñānam ariṣṭebhyo vā ||3.22||
sopakramam nirupakramam ca karma tat-saṁyamāt aparānta-jñānam ariṣṭebhyaḥ vā ||3.22||

## मैत्र्यादिषु बलानि ॥ २३ ॥

maitryādiṣu balāni ||3.23||
maitrī-ādiṣu balāni ||3.23||

## बलेषु हस्तिबलादीनि ॥ २४ ॥

baleṣu hastibalādīni ||3.24||
baleṣu hasti-balādīni ||3.24||
baleṣu hasti-bala-ādīni ||3.24||

## प्रवृत्त्यालोकन्यासात्सूक्ष्मव्यवहितविप्रकृष्टज्ञानम् ॥ २५ ॥

pravṛttyālokanyāsātsūkṣmavyavahitaviprakṛṣṭajñānam ||3.25||
pravṛtty-āloka-nyāsāt sūkṣma-vyavahita-viprakṛṣṭa-jñānam ||3.25||
pravṛtti-āloka-nyāsāt sūkṣma-vyavahita-viprakṛṣṭa-jñānam ||3.25||

## भुवनज्ञानं सूर्ये संयमात् ॥ २६ ॥

bhuvanajñānaṁ sūrye saṁyamāt ||3.26||
bhuvana-jñānaṁ sūrye saṁyamāt ||3.26||
bhuvana-jñānam sūrye saṁyamāt ||3.26||

## चन्द्रे ताराव्यूहज्ञानम् ॥ २७ ॥

candre tārāvyūhajñānam ||3.27||
candre tārā-vyūha-jñānam ||3.27||

## ध्रुवे तद्गतिज्ञानम् ॥ २८ ॥

dhruve tadgatijñānam ||3.28||
dhruve tad-gati-jñānam ||3.28||
dhruve tat-gati-jñānam ||3.28||

## नाभिचक्रे कायव्यूहज्ञानम् ॥ २९ ॥

nābhicakre kāyavyūhajñānam ||3.29||
nābhi-cakre kāya-vyūha-jñānam ||3.29||

## कण्ठकूपे क्षुत्पिपासानिवृत्तिः ॥ ३० ॥

kaṇṭhakūpe kṣutpipāsānivṛttiḥ ||3.30||
kaṇṭha-kūpe kṣut-pipāsā-nivṛttiḥ ||3.30||

## कूर्मनाड्यां स्थैर्यम् ॥ ३१ ॥

kūrmanāḍyāṁ sthairyam ||3.31||
kūrma-nāḍyāṁ sthairyam ||3.31||
kūrma-nāḍyām sthairyam ||3.31||

## मूर्धज्योतिषि सिद्धदर्शनम् ॥ ३२ ॥

mūrdhajyotiṣi siddhadarśanam ||3.32||
mūrdha-jyotiṣi siddha-darśanam ||3.32||

## प्रातिभाद्वा सर्वम् ॥ ३३ ॥

prātibhādvā sarvam ||3.33||
prātibhād vā sarvam ||3.33||
prātibhāt vā sarvam ||3.33||

## हृदये चित्तसंवित् ॥ ३४ ॥

hṛdaye cittasaṁvit ||3.34||
hṛdaye citta-saṁvit ||3.34||

## सत्त्वपुरुषयोरत्यन्तासंकीर्णयोः प्रत्ययाविशेषो भोगः परार्थत्वात्स्वार्थसंयमात्पुरुषज्ञानम् ॥ ३५ ॥

sattvapuruṣayoratyantāsaṅkīrṇayoḥ pratyayāviśeṣo bhogaḥ
parārthatvātsvārthasaṁyamātpuruṣajñānam ||3.35||
sattva-puruṣayor atyantāsaṅkīrṇayoḥ pratyayāviśeṣo bhogaḥ parārthatvāt svārtha-saṁyamāt puruṣa-jñānam ||3.35||
sattva-puruṣayoḥ atyanta-asaṅkīrṇayoḥ pratyaya-aviśeṣaḥ bhogaḥ para-arthatvāt sva-artha-saṁyamāt

puruṣa-jñānam ||3.35||

## ततः प्रातिभश्रावणवेदनादर्शास्वादवार्ता जायन्ते ॥ ३६ ॥

tataḥ prātibhaśrāvaṇavedanādarśāsvādavārtā jāyante ||3.36||
tataḥ prātibha-śrāvaṇa-vedanādarśāsvāda-vārtā jāyante ||3.36||
tataḥ prātibha-śrāvaṇa-vedanā-ādarśa-āsvāda-vārtāḥ jāyante ||3.36||

## ते समाधावुपसर्गा व्युत्थाने सिद्धयः ॥ ३७ ॥

te samādhāvupasargā vyutthāne siddhayaḥ ||3.37||
te samādhāv upasargā vyutthāne siddhayaḥ ||3.37||
te samādhau upasargāḥ vyutthāne siddhayaḥ ||3.37||

## बन्धकारणशैथिल्यात्प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः ॥ ३८ ॥

bandhakāraṇaśaithilyātpracārasaṁvedanācca cittasya paraśarīrāveśaḥ ||3.38||
bandha-kāraṇa-śaithilyāt pracāra-saṁvedanāc ca cittasya para-śarīrāveśaḥ ||3.38||
bandha-kāraṇa-śaithilyāt pracāra-saṁvedanāt ca cittasya para-śarīra-āveśaḥ ||3.38||

## उदानजयाज्जलपङ्ककण्टकादिष्वसङ्ग उत्क्रान्तिश्च ॥ ३९ ॥

udānajayājjalapaṅkakaṇṭakādiṣvasaṅga utkrāntiśca ||3.39||
udāna-jayāj jala-paṅka-kaṇṭakādiṣv asaṅga utkrāntiś ca ||3.39||
udāna-jayāt jala-paṅka-kaṇṭaka-ādiṣu asaṅgaḥ utkrāntiḥ ca ||3.39||

## समानजयाज्ज्वलनम् ॥ ४० ॥

samānajayājjvalanam ||3.40||
samāna-jayāj jvalanam ||3.40||
samāna-jayāt jvalanam ||3.40||

## श्रोत्राकाशयोः संबन्धसंयमाद्दिव्यं श्रोत्रम् ॥ ४१ ॥

śrotrākāśayoḥ sambandhasaṁyamāddivyaṁ śrotram ||3.41||
śrotrākāśayoḥ sambandha-saṁyamād divyaṁ śrotram ||3.41||
śrotra-ākāśayoḥ sambandha-saṁyamāt divyam śrotram ||3.41||

कायाकाशयोः संबन्धसंयमाल्लघुतूलसमापत्तेश्चाकाशगमनम् ॥ ४२ ॥

kāyākāśayoḥ sambandhasaṁyamāllaghutūlasamāpatteścākāśagamanam ||3.42||
kāyākāśayoḥ sambandha-saṁyamāl laghu-tūla-samāpatteś cākāśa-gamanam ||3.42||
kāya-ākāśayoḥ sambandha-saṁyamāt laghu-tūla-samāpatteḥ ca ākāśa-gamanam ||3.42||

बहिरकल्पिता वृत्तिर्महाविदेहा । ततः प्रकाशावरणक्षयः ॥ ४३ ॥

bahirakalpitā vṛttirmahāvidehā|3.tataḥ prakāśāvaraṇakṣayaḥ ||3.43||
bahir-akalpitā vṛttir mahā-videhā tataḥ prakāśāvaraṇa-kṣayaḥ ||3.43||
bahiḥ-akalpitā vṛttiḥ mahā-videhā tataḥ prakāśa-āvaraṇa-kṣayaḥ ||3.43||

स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमाद्भूतजयः ॥ ४४ ॥

sthūlasvarūpasūkṣmānvayārthavattvasaṁyamādbhūtajayaḥ ||3.44||
sthūla-svarūpa-sūkṣmānvayārthavattva-saṁyamād bhūta-jayaḥ ||3.44||
sthūla-svarūpa-sūkṣma-anvaya-arthavattva-saṁyamāt bhūta-jayaḥ ||3.44||

ततोऽणिमादिप्रादुर्भावः कायसंपत्तद्धर्मानभिघातश्च ॥ ४५ ॥

tato'ṇimādiprādurbhāvaḥ kāyasampattaddharmānabhighātaśca ||3.45||
tato 'ṇimādi-prādur-bhāvaḥ kāya-sampat tad-dharmānabhighātaś ca ||3.45||
tataḥ aṇima-ādi-prādurbhāvaḥ kāya-sampat tat-dharma-anabhighātaḥ ca ||3.45||

रूपलावण्यबलवज्रसंहननत्वानि कायसंपत् ॥ ४६ ॥

rūpalāvaṇyabalavajrasaṁhananatvāni kāyasampat ||3.46||
rūpa-lāvaṇya-bala-vajra-saṁhananatvāni kāya-sampat ||3.46||

ग्रहणस्वरूपास्मितान्वयार्थवत्त्वसंयमादिन्द्रियजयः ॥ ४७ ॥

grahaṇasvarūpāsmitānvayārthavattvasaṁyamādindriyajayaḥ ||3.47||
grahaṇa-svarūpāsmitānvayārthavattva-saṁyamād indriya-jayaḥ ||3.47||
grahaṇa-svarūpa-asmitā-anvaya-arthavattva-saṁyamāt indriya-jayaḥ ||3.47||

ततो मनोजवित्वं विकरणभावः प्रधानजयश्च ॥ ४८ ॥

tato manojavitvaṁ vikaraṇabhāvaḥ pradhānajayaśca ||3.48||
tato mano-javitvaṁ vikaraṇa-bhāvaḥ pradhāna-jayaś ca ||3.48||

tataḥ manaḥ-javitvam vikaraṇa-bhāvaḥ pradhāna-jayaḥ ca ||3.48||

## सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वं च ॥ ४९ ॥

sattvapuruṣānyatākhyātimātrasya sarvabhāvādhiṣṭhātṛtvaṁ sarvajñātṛtvaṁ ca ||3.49||
sattva-puruṣānyatā-khyāti-mātrasya sarva-bhāvādhiṣṭhātṛtvaṁ sarva-jñātṛtvaṁ ca ||3.49||
sattva-puruṣa-anyatā-khyāti-mātrasya sarva-bhāva-adhiṣṭhātṛtvam sarva-jñātṛtvam ca ||3.49||

## तद्वैराग्यादपि दोषबीजक्षये कैवल्यम् ॥ ५० ॥

tadvairāgyādapi doṣabījakṣaye kaivalyam ||3.50||
tad-vairāgyād api doṣa-bīja-kṣaye kaivalyam ||3.50||
tat-vairāgyāt api doṣa-bīja-kṣaye kaivalyam ||3.50||

## स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्टप्रसङ्गात् ॥ ५१ ॥

sthānyupanimantraṇe saṅgasmayākaraṇaṁ punaraniṣṭaprasaṅgāt ||3.51||
sthāny-upanimantraṇe saṅga-smayākaraṇaṁ punar-aniṣṭa-prasaṅgāt ||3.51||
sthāni-upanimantraṇe saṅga-smaya-akaraṇam punaḥ-aniṣṭa-prasaṅgāt ||3.51||

## क्षणतत्क्रमयोः संयमाद्विवेकजं ज्ञानम् ॥ ५२ ॥

kṣaṇatatkramayoḥ saṁyamādvivekajaṁ jñānam ||3.52||
kṣaṇa-tat-kramayoḥ saṁyamād vivekajaṁ jñānam ||3.52||
kṣaṇa-tat-kramayoḥ saṁyamāt vivekajam jñānam ||3.52||

## जातिलक्षणदेशैरन्यतानवच्छेदात्तुल्ययोस्ततः प्रतिपत्तिः ॥ ५३ ॥

jātilakṣaṇadeśairanyatānavacchedāttulyayostataḥ pratipattiḥ ||3.53||
jāti-lakṣaṇa-deśair anyatānavacchedāt tulyayos tataḥ pratipattiḥ ||3.53||
jāti-lakṣaṇa-deśaiḥ anyatā-anavacchedāt tulyayoḥ tataḥ pratipattiḥ ||3.53||

## तारकं सर्वविषयं सर्वथाविषयमक्रमं चेति विवेकजं ज्ञानम् ॥ ५४ ॥

tārakaṁ sarvaviṣayaṁ sarvathāviṣayamakramaṁ ceti vivekajaṁ jñānam ||3.54||
tārakaṁ sarva-viṣayaṁ sarvathā-viṣayam akramaṁ ceti vivekajaṁ jñānam ||3.54||
tārakam sarva-viṣayam sarvathā-viṣayam akramam ca iti vivekajam jñānam ||3.54||

## सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यम् ॥ ५५ ॥

sattvapuruṣayoḥ śuddhisāmye kaivalyam ||3.55||
sattva-puruṣayoḥ śuddhi-sāmye kaivalyam ||3.55||

## इति पतञ्जलिविरचिते योगसूत्रे तृतीयो विभूतिपादः

iti patañjaliviracite yogasūtre tṛtīyo vibhūtipādaḥ
iti patañjali-viracite yoga-sūtre tṛtīyaḥ vibhūti-pādaḥ

# चतुर्थः कैवल्यपादः ।

# Caturthaḥ Kaivalya-Pādaḥ |

## जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धयः ॥ १ ॥

janmauṣadhimantratapaḥsamādhijāḥ siddhayaḥ ||4.1||
janmauṣadhi-mantra-tapaḥ-samādhi-jāḥ siddhayaḥ ||4.1||
janma-auṣadhi-mantra-tapaḥ-samādhi-jāḥ siddhayaḥ ||4.1||

## जात्यन्तरपरिणामः प्रकृत्यापूरात् ॥ २ ॥

jātyantarapariṇāmaḥ prakṛtyāpūrāt ||4.2||
jāty-antara-pariṇāmaḥ prakṛty-āpūrāt ||4.2||
jāti-antara-pariṇāmaḥ prakṛti-āpūrāt ||4.2||

## निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत् ॥ ३ ॥

nimittamaprayojakaṁ prakṛtīnāṁ varaṇabhedastu tataḥ kṣetrikavat ||4.3||
nimittam aprayojakaṁ prakṛtīnāṁ varaṇa-bhedas tu tataḥ kṣetrikavat ||4.3||
nimittam aprayojakam prakṛtīnām varaṇa-bhedaḥ tu tataḥ kṣetrikavat ||4.3||

## निर्माणचित्तान्यस्मितामात्रात् ॥ ४ ॥

nirmāṇacittānyasmitāmātrāt ||4.4||
nirmāṇa-cittāny asmitā-mātrāt ||4.4||
nirmāṇa-cittāni asmitā-mātrāt ||4.4||

प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषाम्॥ ५॥

pravṛttibhede prayojakaṁ cittamekamanekeṣām ||4.5||
pravṛtti-bhede prayojakaṁ cittam ekam anekeṣām ||4.5||
pravṛtti-bhede prayojakam cittam ekam anekeṣām ||4.5||

तत्र ध्यानजमनाशयम्॥ ६॥

tatra dhyānajamanāśayam ||4.6||
tatra dhyāna-jam anāśayam ||4.6||

कर्माशुक्लाकृष्णं योगिनः त्रिविधमितरेषाम्॥ ७॥

karmāśuklākṛṣṇaṁ yoginaḥ trividhamitareṣām ||4.7||
karmāśuklākṛṣṇaṁ yoginaḥ trividham itareṣām ||4.7||
karma aśukla-akṛṣṇam yoginaḥ tri-vidham itareṣām ||4.7||

ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानाम्॥ ८॥

tatastadvipākānuguṇānāmevābhivyaktirvāsanānām ||4.8||
tatas tad-vipākānuguṇānām evābhivyakti vāsanānām ||4.8||
tataḥ tat-vipāka-anuguṇānām eva abhivyaktiḥ vāsanānām ||4.8||

जातिदेशकालव्यवहितानामप्यानन्तर्यं स्मृतिसंस्कारयोरेकरूपत्वात्॥ ९॥

jātideśakālavyavahitānāmapyānantaryaṁ smṛtisaṁskārayorekarūpatvāt ||4.9||
jāti-deśa-kāla-vyavahitānām apy ānantaryaṁ smṛti-saṁskārayor eka-rūpatvāt ||4.9||
jāti-deśa-kāla-vyavahitānām api ānantaryam smṛti-saṁskārayoḥ eka-rūpatvāt ||4.9||

तासामनादित्वं चाशिषो नित्यत्वात्॥ १०॥

tāsāmanāditvaṁ cāśiṣo nityatvāt ||4.10||
tāsām anāditvaṁ cāśiṣo nityatvāt ||4.10||
tāsām anāditvam ca āśiṣaḥ nityatvāt ||4.10||

हेतुफलाश्रयालम्बनैः संगृहीतत्वादेषामभावे तदभावः॥ ११॥

hetuphalāśrayālambanaiḥ saṅgṛhītatvādeṣāmabhāve tadabhāvaḥ ||4.11||
hetu-phalāśrayālambanaiḥ saṅgṛhītatvād eṣām abhāve tad-abhāvaḥ ||4.11||

hetu-phala-āśraya-ālambanaiḥ saṅgṛhītatvāt eṣām abhāve tat-abhāvaḥ ||4.11||

## अतीतानागतं स्वरूपतोऽस्त्यध्वभेदाद्धर्माणाम् ॥ १२ ॥

atītānāgataṁ svarūpato'styadhvabhedāddharmāṇām ||4.12||
atītānāgataṁ svarūpato 'sty adhva-bhedād dharmāṇām ||4.12||
atīta-anāgatam svarūpataḥ asti adhva-bhedāt dharmāṇām ||4.12||

## ते व्यक्तसूक्ष्मा गुणात्मानः ॥ १३ ॥

te vyaktasūkṣmā guṇātmānaḥ ||4.13||
te vyakta-sūkṣmā guṇātmānaḥ ||4.13||
te vyakta-sūkṣmāḥ guṇa-ātmānaḥ ||4.13||

## परिणामैकत्वाद्वस्तुतत्त्वम् ॥ १४ ॥

pariṇāmaikatvādvastutattvam ||4.14||
pariṇāmaikatvād vastu-tattvam ||4.14||
pariṇāma-ekatvāt vastu-tattvam ||4.14||

## वस्तुसाम्ये चित्तभेदात्तयोर्विभक्तः पन्थाः ॥ १५ ॥

vastusāmye cittabhedāttayorvibhaktaḥ panthāḥ ||4.15||
vastu-sāmye citta-bhedāt tayor vibhaktaḥ panthāḥ ||4.15||
vastu-sāmye citta-bhedāt tayoḥ vibhaktaḥ panthāḥ ||4.15||

## न चैकचित्ततन्त्रं वस्तु तदप्रमाणकं तदा किं स्यात् ॥ १६ ॥

na caikacittatantraṁ vastu tadapramāṇakaṁ tadā kiṁ syāt ||4.16||
na caikacitta-tantraṁ vastu tad-apramāṇakaṁ tadā kiṁ syāt ||4.16||
na ca eka-citta-tantram vastu tat-apramāṇakam tadā kim syāt ||4.16||

## तदुपरागापेक्षित्वाच्चित्तस्य वस्तु ज्ञाताज्ञातम् ॥ १७ ॥

taduparāgāpekṣitvāccittasya vastu jñātājñātam ||4.17||
tad-uparāgāpekṣitvāc cittasya vastu jñātājñātam ||4.17||
tad-uparāga-apekṣitvāt cittasya vastu jñāta-ajñātam ||4.17||

## सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामित्वात् ॥ १८ ॥

sadā jñātāścittavṛttayastatprabhoḥ puruṣasyāpariṇāmitvāt ||4.18||
sadā jñātāś citta-vṛttayas tat-prabhoḥ puruṣasyāpariṇāmitvāt ||4.18||
sadā jñātāḥ citta-vṛttayaḥ tat-prabhoḥ puruṣasya apariṇāmitvāt ||4.18||

## न तत्स्वाभासं दृश्यत्वात् ॥ १९ ॥

na tatsvābhāsaṁ dṛśyatvāt ||4.19||
na tat svābhāsaṁ dṛśyatvāt ||4.19||
na tat sva-ābhāsam dṛśyatvāt ||4.19||

## एकसमये चोभयानवधारणम् ॥ २० ॥

ekasamaye cobhayānavadhāraṇam ||4.20||
eka-samaye cobhayānavadhāraṇam ||4.20||
eka-samaye ca ubhaya-anavadhāraṇam ||4.20||

## चित्तान्तरदृश्ये बुद्धिबुद्धेरतिप्रसङ्गः स्मृतिसंकरश्च ॥ २१ ॥

cittāntaradṛśye buddhibuddheratiprasaṅgaḥ smṛtisaṅkaraśca ||4.21||
cittāntara-dṛśye buddhi-buddher atiprasaṅgaḥ smṛti-saṅkaraś ca ||4.21||
citta-antara-dṛśye buddhi-buddheḥ atiprasaṅgaḥ smṛti-saṅkaraḥ ca ||4.21||

## चितेरप्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेदनम् ॥ २२ ॥

citerapratisaṅkramāyāstadākārāpattau svabuddhisaṁvedanam ||4.22||
citer apratisaṅkramāyās tad-ākārāpattau sva-buddhi-saṁvedanam ||4.22||
citeḥ apratisaṅkramāyāḥ tat-ākāra-āpattau sva-buddhi-saṁvedanam ||4.22||

## द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थम् ॥ २३ ॥

draṣṭṛdṛśyoparaktaṁ cittaṁ sarvārtham ||4.23||
draṣṭṛ-dṛśyoparaktaṁ cittaṁ sarvārtham ||4.23||
draṣṭṛ-dṛśya-uparaktam cittam sarva-artham ||4.23||

## तदसंख्येय-वासनाभिश्चित्रमपि परार्थं संहत्यकारित्वात् ॥ २४ ॥

tadasaṅkhyeya-vāsanābhiścitramapi parārthaṁ saṁhatyakāritvāt ||4.24||

tad asaṅkhyeya-vāsanābhiś citram api parārthaṁ saṁhatya-kāritvāt ||4.24||
tat asaṅkhyeya-vāsanābhiḥ citram api para-artham saṁhatya-kāritvāt ||4.24||

## विशेषदर्शिन आत्मभावभावनाविनिवृत्तिः ॥ २५ ॥

viśeṣadarśina ātmabhāvabhāvanāvinivṛttiḥ ||4.25||
viśeṣa-darśina ātma-bhāva-bhāvanā-vinivṛttiḥ ||4.25||
viśeṣa-darśinaḥ ātma-bhāva-bhāvanā-vinivṛttiḥ ||4.25||

## तदा विवेकनिम्नं कैवल्यप्राग्भारं चित्तम् ॥ २६ ॥

tadā vivekanimnaṁ kaivalyaprāgbhāraṁ cittam ||4.26||
tadā viveka-nimnaṁ kaivalya-prāgbhāraṁ cittam ||4.26||
tadā viveka-nimnam kaivalya-prāgbhāram cittam ||4.26||

## तच्छिद्रेषु प्रत्ययान्तराणि संस्कारेभ्यः ॥ २७ ॥

tacchidreṣu pratyayāntarāṇi saṁskārebhyaḥ ||4.27||
tac-chidreṣu pratyayāntarāṇi saṁskārebhyaḥ ||4.27||
tat-chidreṣu pratyaya-antarāṇi saṁskārebhyaḥ ||4.27||

## हानमेषां क्लेशवदुक्तम् ॥ २८ ॥

hānameṣāṁ kleśavaduktam ||4.28||
hānam eṣāṁ kleśavad uktam ||4.28||
hānam eṣām kleśavat uktam ||4.28||

## प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः ॥ २९ ॥

prasaṅkhyāne'pyakusīdasya sarvathā vivekakhyāterdharmameghaḥ samādhiḥ ||4.29||
prasaṅkhyāne 'py akusīdasya sarvathā viveka-khyāter dharma-meghaḥ samādhiḥ ||4.29||
prasaṅkhyāne api akusīdasya sarvathā viveka-khyāteḥ dharma-meghaḥ samādhiḥ ||4.29||

## ततः क्लेशकर्मनिवृत्तिः ॥ ३० ॥

tataḥ kleśakarmanivṛttiḥ ||4.30||
tataḥ kleśa-karma-nivṛttiḥ ||4.30||

## तदा सर्वावरणमलापेतस्य ज्ञानस्यानन्त्याज्ज्ञेयमल्पम्॥ ३१ ॥

tadā sarvāvaraṇamalāpetasya jñānasyānantyājjñeyamalpam ||4.31||
tadā sarvāvaraṇa-malāpetasya jñānasyānantyāj jñeyam alpam ||4.31||
tadā sarva-āvaraṇa-mala-apetasya jñānasya anantyāt jñeyam alpam ||4.31||

## ततः कृतार्थानां परिणामक्रमपरिसमाप्तिर्गुणानाम्॥ ३२ ॥

tataḥ kṛtārthānāṁ pariṇāmakramaparisamāptirguṇānām ||4.32||
tataḥ kṛtārthānāṁ pariṇāma-krama-samāptir guṇānām ||4.32||
tataḥ kṛta-arthānām pariṇāma-krama-samāptiḥ guṇānām ||4.32||

## क्षणप्रतियोगी परिणामापरान्तनिर्ग्राह्यः क्रमः ॥ ३३ ॥

kṣaṇapratiyogī pariṇāmāparāntanirgrāhyaḥ kramaḥ ||4.33||
kṣaṇa-pratiyogī pariṇāmāparānta-nirgrāhyaḥ kramaḥ ||4.33||
kṣaṇa-pratiyogī pariṇāma-apara-anta-nirgrāhyaḥ kramaḥ ||4.33||

## पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति ॥ ३४ ॥

puruṣārthaśūnyānāṁ guṇānāṁ pratiprasavaḥ kaivalyaṁ svarūpapratiṣṭhā vā citiśaktiriti ||4.34||
puruṣārtha-śūnyānāṁ guṇānāṁ pratiprasavaḥ kaivalyaṁ svarūpa-pratiṣṭhā vā citi-śaktir iti ||4.34||
puruṣa-artha-śūnyānām guṇānām pratiprasavaḥ kaivalyam svarūpa-pratiṣṭhā vā citi-śaktiḥ iti ||4.34||

## इति पतञ्जलिविरचिते योगसूत्रे चतुर्थः कैवल्यपादः ।

iti patañjali-viracite yoga-sūtre caturthaḥ kaivalya-pādaḥ |

## इति पातञ्जलयोगसूत्राणि ॥

iti pātañjala-yoga-sūtrāṇi ||